PDF Compressor Pro

परावेदः

प्रतिपद्

अर्जुन–विषादः

धृतराष्ट्र उवाच

१. धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय । १-१

संजय उवाच

२. दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ १-२

३. पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ १-३

४. अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ १-४

५. धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ १-५

PDF Compressor Pro

६. युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ १-६

७. अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ १-७

८. भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ १-८

९. अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ १-९

१०. अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १-१०

११. अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ १-११

१२. तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥
१-१२

१३. ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १-१३

१४. ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १-१४

PDF Compressor Pro

१५. पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १-१५

१६. अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १-१६

१७. काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १-१७

१८. द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥ १-१८

१९. स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १-१९

२०. अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥ १-२०

२१. हृषीकेशं तदा वाक्यमिदमाह महीपते ।
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ १-२१

२२. यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ १-२२

२३. योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ १-२३

PDF Compressor Pro

संजय उवाच

२४. एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ १-२४

२५. भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ १-२५

२६. तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ।
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ॥ १-२६

२७. तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ।
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ॥ १-२७

अर्जुन उवाच

२८. दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।
सीदन्ति मम गात्राणि मुखं च परिशुष्यति॥ १-२८

२९. वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।
गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ॥ १-२९

३०. न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ।
निमित्तानि च पश्यामि विपरीतानि केशव॥ १-३०

PDF Compressor Pro

३१. न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ।
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥
१-३१

३२. किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ।
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥
१-३२

३३. आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ॥
१-३३

३४. एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते॥ १-३४

३५. निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ १-३५

३६. तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान्
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ १-३६

३७. यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ १-३७

PDF Compressor Pro

३८. कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ १-३८

३९. कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ १-३९

४०. अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ १-४०

४१. संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ १-४१

४२. दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥
१-४२

४३. उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम ॥ १-४३

४४. अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ १-४४

४५. यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ १-४५

PDF Compressor Pro

सञ्जय उवाच ।

४६. एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।
न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ॥२-९

४७. तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ २-१०

श्रीभगवानुवाच

४८. अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः॥ २-११

४९. श्रोत्रियस्येव ते पार्थ मन्दकस्याविपश्चितः ।
अनुवाकहता बुद्धिर् नैषा तत्त्वार्थदर्शिनी ॥

५०. न त्वेवांह जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥२-१२

५१. देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ २-१३

५२. नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥ २-१६

५३. अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ २-१७

PDF Compressor Pro

५४. अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ २-१८

५५. य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥ २-१९

५६. न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ २-२०

५७. वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ २-२१

५८. वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥ २-२२

५९. यथा रुरुः श्रृङ्गम् अथो पुराणम्
हित्वा त्वचं वाप्युरगो यथा च।
विहाय गच्छत्यनवेक्षमाणः
तथा विमुक्तो विजहाति दुःखम् ॥

PDF Compressor Pro

६०. नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २-२३

६१. अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥२-२४

६२. अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २-२५

६३. अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २-२६

६४. जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २-२७

६५. सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ताः मरणान्तं च जीवितम् ॥

६६. अहन्यहनि भूतानि गच्छन्ति यममन्दिरम् ।
शेषाः स्थिरत्वम् इच्छन्ति किमाश्चर्यम् अतःपरम ॥

६७. पुनः पुनर् जायमाना पुराणी
समानं वर्णं अभिशुम्भमाना ।
श्वघ्नीव कृन्तुर् विज आभिनाना
मर्त्यस्य देवी जरयन्ति आयुः॥ ऋक्–१-९२-१०

PDF Compressor Pro

६८. न ह्यहानि निर्तन्ते न मासा न पुनः क्षपा ।
सो अयं प्रपद्यते अध्वानं चिराय ध्रुवम् अध्रुवः ॥

६९. **ईयुस्ते ये पूर्वतराम् अपश्यन्**
वि उच्छन्तीम् उषसं मर्त्यासः ॥
अस्माभिर् उ नु प्रतिचक्ष्या अभूद्
ओ ते यन्ति ये अपरीषु पश्यान् ॥

ऋक्.–१-११३-११

७०. एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
यस्य कालः प्रयात्यग्रे तत्र का परिवेदना ॥

७१. सो अयं विजुलमध्वानं कालेन ध्रुवमध्रुवः ।
नरो अवशः समभ्येति सर्वभूतनिषेवितम् ॥

७२. क्व नु ते अद्य पिता पार्थ क्व नु ते अद्य पितामहाः ।
न त्वं पश्यसि तान् अद्य न त्वां पश्यन्ति ते अनघ ॥

७३. मृताः गर्भेषु जायन्ते जातमात्रा म्रियन्ति च ।
चक्रमन्तो म्रियन्ते च यौवनस्था तथा अपरे ॥

७४. कालः कर्षति भूतानि सर्वाणि विविधान्युत ।
न कालस्य प्रियः कश्चिन् न द्वेष्यः कुरुसत्तम ॥

७५. पुरुषस्य हि दृष्ट्वेमां उत्पत्तिं अनिमित्ततः ।
यदृच्छया विनाशं च शोकहर्षाव् अनर्थकौ ॥

PDF Compressor Pro

७६. किं नु मुह्यसि मूढस् त्व शोच्यं किम् अनुशोचसि ।
यदा त्वामपि शोचन्त शोच्यायास्यन्ति तां गतिम् ॥

७७. कुतो असि आगतः को असि क्व गमिष्यसि
कस्य वा ।
कस्मिन् स्थितः क्व भविता कस्मात् किन्
अनुशोचसि ॥

७८ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २-२८

७९. आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २-२९

८०. देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥
२-३०

८१. स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥
२-३१

PDF Compressor Pro

८२. जयो वधो वा संग्रामे धात्रादिष्टः सनातनः ।
स्वधर्मः क्षत्रियस्यैषः कार्पण्यं न प्रशस्यते ॥

८३. यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥
२-३२

८४. न चैतद् अनुरूपं ते यत्ते ग्लानिर् अरिन्दम ।
यद् ओजसा न लभते क्षत्रियो न तद् अश्नुते ॥

८५. अधर्मः क्षत्रियस्यैषः यच् शय्यामरणं भवेत् ।
विसृजन् श्लेष्ममूत्रानि कृपणं परिदेवयन् ॥

८६. यानि दुःखानि सहते क्षत्रियः युधिताधितः ।
तेन तेन तपो भूय इति धर्मविदो विदुः ॥

८७. अशोच्यः हि हतः शूरः स्वर्गलोके महीयते ।
न ह्यन्नं नोदकं तस्य न स्नानं नाप्यशौचकम् ॥

८८. कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रति योत्स्यामि पूजार्हावरिसूदन ॥२-४

८९. गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥ २-५

PDF Compressor Pro

९०. न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ २–६

९१. कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ २-७

९२. न हि प्रपश्यामि ममापनुद्याद्-
यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ॥ २-८

९३. एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः । १-४६

PDF Compressor Pro

द्वितीया ।

पुरुषार्थ-विनिश्चयः ।

१. तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ २-१

२. कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २-२

३. क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ २-३

४. यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।
बुद्धिं तस्यापकर्षन्ति सो अर्वाचीनानि पश्यति ॥

५. यत्र नास्ति शरैः कार्यम् न मित्रैर् न च बन्धुभिः।
आत्मनैकेन योद्धव्यं तत् युद्धम् उपस्थितम्॥

६. व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥
२-४१

७. यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ २-४२

PDF Compressor Pro

८. कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ २-४३

९. भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥
२-४४

१०. अन्यच्च श्रेयस् अन्यद् उतैव प्रेयस्
ते उभे नानार्थे पुरुषं सिनीतः ।
श्रेयस् आददानस्य साधु भवति ।
हीयते अर्थाद् य उ प्रेयस् वृणीते ॥

११. श्रेयश्च प्रेयश्च मनुष्यम् एतस्
तौ सम्परीत्य विविनक्ति धीरः ।
श्रेयस् हि धीरो अभिप्रेयसो वृणीते
प्रेयस् मन्दो योगक्षेमाद् वृणीते ॥

१२. सुविज्ञानं चिकितुषे जनाय
सच् च असच् च वचसी पस्पृधाते ।
तयोर् यत् सत्यम् यतरद् ऋजीयस्
तद् इत् सोमो अवति हन्ति असत् ॥
ऋक्. ७-१०४-१२

PDF Compressor Pro

१३. यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचार ॥२-९

१४. यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥
४-३१

१५. यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।
१६-२३

१६. सुखं सुखेनेह न जातु लभ्यम्
दुःखेन पार्थ लभते सुखानि ।
इमं तु ते मार्गम् अपेतमोहम्
वक्ष्यामि चित्तग्रहणाय सुष्ठु ॥

१७. सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥
१८-३६

१८. यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥
१८-३७

PDF Compressor Pro

१९. विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ १८-३८

२०. यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ १८-३९

२१. वधबन्धपरिक्लेशैः क्लिश्यन्ते च पुनःपुनः ।
ते खल्वपि रमन्ते च मोदन्ते च हसन्ति च ॥

२२. ये च मूढतमा लोके ये च बुद्धेः पारं गताः ।
त एव सुखम् एधन्ते क्लिश्यत्य् अन्तरितो जनः ॥

२३. अथ ये बुद्धिम् अप्राप्ताः व्यतिक्रान्ताश्च मूढताम् ।
ते अतिवेलं प्रहृष्यन्ति सन्तापं उपयान्ति च ॥

२४. या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥
२-६९

२५. प्रवृत्तिं च निवृत्तिं च दानवा न विदुर् जनाः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ १६-७

२६. असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ १६-८

२७. एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ १६-९

PDF Compressor Pro

२८. काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥
१६-१०

२९. चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः॥ १६-११

३०. आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥ १६-१२

३१. इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १६-१३

३२. असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥
१६-१४

३३. आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥
१६-१५

३४. अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥ १६-१६

३५. आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १६-१७

PDF Compressor Pro

३६. अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १६-१८

३७. तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानदानवीष्वेव योनिषु॥ १६-१९

३८. दानवीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥
१६-२०

३९. न जातु कामान् न भयान् न लोभाद्
धर्मं त्यजेत् जीवितस्यापि हेतोः ।
धर्मो नित्यः सुखदुःखे त्वनित्ये
जीवोनित्यो हेतुर् अस्य त्वनित्यः ॥

४०. हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत् त्वं पूषन्नपावृणु सत्यधर्म्माय दृष्टये ॥
यजु.—४०-१७

४१. सुखं वा यदि वा दुःखं प्रियं वा यदि वा अप्रियम् ।
प्राप्तं प्राप्तम् उपासीत हृदयेनापराजितः ॥

४२. अस्त्येव त्वयि शोको अपि हर्षश्चापि तथा त्वयि ।
सुखदुःखे तथा चोभे तत्र का परिवेदना ॥

PDF Compressor Pro

४३. चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ६-३४

४४. न ह्येव कर्ता पुरुषः कर्मणः शुभपापयोः ।
अस्वतन्त्रो हि पुरुषः कार्यते दारुयन्त्रवत् ॥

४५. कालसञ्चोदितो लोकः कालपर्यायनिश्चितः ।
उत्तमाधममध्यानि कर्म्माणि कुरुते अवशः ॥

४६. यदि स्यात् पुरुषः कर्ता कृष्णात्म-श्रेयसे ध्रुवम् ।
आरम्भास् तस्य सिद्धेयुर् न तु जातु पराभवेत् ॥

४७. वायुम् आकाशम् अग्निं च चन्द्रादित्याव् अहःमने ।
ज्योतींषि सरितः शैलान् कः करोति बिभर्ति च ॥

४८. शीतमुष्णं तथा वर्षं कालेन परिवर्तते ।
एवमेव मनुष्याणां सुखदुःखे नरर्षभ ॥

४९. असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ६-३५

५०. असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥
६-३६

PDF Compressor Pro

५१. वासनौघस् त्वया पूर्वम् अभ्यासेन घनीकृतः ।
यद् यद् अभ्यस्यते लोके तन्मयेनैव भूयते ॥

५२. कर्म्मणा क्रियते कर्ता कर्त्रा कर्म प्रमीयते ।
बीजाङ्कुरादिवन् न्यायो लोक वेदोक्त एव च ॥

५३. मन एव समर्थं वै मनसो दृढनिग्रहे ।
अराजा कः समर्थः स्याद् राज्ञः पाण्डव निग्रहे ॥

५४. यावन् न तत्त्वविज्ञानं तावच् चित्तशमः कुतः ।
यावन् न चित्तोपशमः न तावत् तत्त्ववेदनम् ॥

५५. तस्मात् कौरव यत्नेन पौरुषेण विवेकिना ।
भोगेच्छां दूरतस् त्यक्त्वा द्वयं समं समाश्रयेत् ॥

५६. पौरुषं कारणं केचिद् आहुः कर्मसु मानवाः ।
दैवमेके प्रशंसन्ति स्वभावम् अपरे जनाः ॥

५७. पौरुषं कर्म्म दैवं च फलवृत्तिस्वभावतः ।
त्रयमेतद् पृथग्-भूतम् अविवेकं तु केचन ॥

५८. एतद् एवं च नैवं च न चोभे नानुभे तथा ।
कर्मस्थं विषयं ब्रूयुः सत्त्वस्थाः समदर्शिनः ॥

५९. यदि कालं प्रमाणं ते कस्माद् धर्मो अस्ति कर्तृषु ।
कालेनैते प्रवर्तन्ते कः कस्येहापराध्यति ॥

PDF Compressor Pro

६०. यो यस्मिन् कुरुते कर्म यादृशं येन यत्र च ।
तादृशं तादृशेनैव स गुणं प्रतिपद्यते ।।

६१. सुशीघ्रमपि धावन्तं विधानम् अनुधावति ।
शेते सह शयानेन येन येन यथा कृतम् ।।

६२. उपतिष्ठति तिष्ठन्तम् गच्छन्तम् अनुगच्छति ।
करोति कुर्वतः कर्म छायेवानुविधीयते ।।

६३. इष्टापूर्तफलं न स्यात् न शिष्यः न गुरुर् भवेत् ।
पुरुषः कर्मसाध्येषु स्याच् चेद् अयम् अकारणम् ।।

६४. चेष्टाम् अकुर्वल् लभते यदि किञ्चिद् यदृच्छया ।
यो वा न लभते कृत्वा दुर्दशौ ताव् उभावपि ।।

६५. नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।। ५-१५

६६. ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ।। ५-१६

६७. शुभाशुभाभ्याम् मार्गाभ्याम् वहन्ती वासनासरित् ।
पौरुषेण प्रयत्नेन योजनीया शुभे पथि ।।

६८. अशुभाच् चालितं याति शुभं तस्माद् अपीतरत् ।
पौरुषेण प्रयत्नेन लालयेत् चित्तबालकम् ।।

PDF Compressor Pro

६९. दृष्ट्वा रूपे व्याकरोत्सत्यानृते प्रजापतिः ।
अश्रद्धाम् अनृते अद्धाच् श्रद्धां सत्ये प्रजापतिः॥
यजु.–२९–३७

७०. यत् प्रज्ञानम् उत चेतो धृतिश्च
यज् ज्योतिर् अन्तर् अमृतं प्रजासु ।
यस्मान् न ऋते किञ्चन कर्म क्रियते
तन् मे मनः शिवसंकल्पम् अस्तु ॥
यजु.–३५-३

७१. भद्रं कर्णेभिः शृणुयाम देवाः
भद्रं पश्येम अक्षभिर् यजत्रा ।
स्थिरैर् अङ्गैस् तुष्टुवांसस् तनुभिः
व्यशेम देवहितं यद् आयुः ॥
ऋक् –१-८९-८

७२. अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ।
युयोधि अस्मज् जुहुराणम् एनः
भूयिष्ठां ते नम उक्तिं विधेम ॥
यजु.–४०-१७

७३. पुलाका इव धान्येषु पुत्तिका इव पक्षिषु ।
तद्विधास् ते मनुष्यानां येषाम् धर्मो न कारणम् ॥

PDF Compressor Pro

७४. तस्माद् धर्मप्रधानेन भवितव्यम् यतात्मना ।
तथा सर्वेत्रभूतेषु वर्तितव्यम् यथात्मनि ॥

७५. निर्वृत्तिः कर्मणः पापात् सततं पुण्यशीलता ।
सद्वृत्तिः समुदाचारः श्रेय एतद् अनुत्तमम् ॥

७६. धर्मेणैवर्षयस् तीर्णाः धर्मे लोका प्रतिष्ठिताः ।
धर्मेण देवा वावृधुः धर्मे चार्थः समाहितः ॥

७७. पूर्वे समुद्रे यः पन्थाः न स गच्छति पश्चिमम् ।
तस्माद् धर्मे प्रवर्तेथाः सर्वावस्थः परन्तप ॥

७८. शतं चैका च हृदयस्य नाड्यस्
तासां मुर्द्धाणम् अभिनिसृतैका ।
तयोर्द्ध्वम् आयन्न् अमृतत्वम् एति
विश्वङ् अन्या उत्क्रमणे भवन्ति ॥

७९. सुखे वा यदि वा दुःखे वर्तमानो विचक्षणः ।
यश् चिणोति शुभान्येव स भद्रम् इह पश्यति ॥

८०. ये अर्था धर्मेण ते सत्याः ये अधर्मेण धिगस्तु तान् ।
धर्म्मं वै शाश्वतं लोके न जह्याद् अर्थकाङ्क्षया ॥

८१. अपि पापकृतो रौद्राः सत्यं कृत्वा पृथक् पृथक् ।
ते चेन् मिथो अधृतिं कुर्युः विनश्येयुर् असंशयम् ॥

PDF Compressor Pro

८२. पापा ह्यपि तदा क्षेमं न लभन्ते कदाचन ।
एकस्य हि द्वौ हरतो द्वयोश्च बहवो अपरे ॥

८३. आपत्सु च धारयति धर्मं धर्मविद् उत्तमः ।
व्यसनं ह्येव धर्मस्य धर्मिणाम आपद् उच्यते ॥

८४. वृत्तं यत्नेन संरक्षेद् वित्तम् एति च याति च ।
अक्षीणो वित्ततो क्षीणो वृत्ततस् तु हतो हतः ॥

८५. न च कामान् न संरभान् न द्वेषाद् धर्मम् उत्सृजेत् ।
अमाययैव वर्तेत न च सत्यं त्यजेद् बुधः ॥

८६. धर्म एव कृतः श्रेयान् इहलोके परत्र च ।
तस्माद् हि परमं नास्ति यथा प्राहुर् मनीषिणः ॥

८७. नावमन्ये न गर्हे च धर्मं कृष्ण कथञ्चन ।
आर्तो अहं प्रलपामीदं इति मां विद्धि केशव ॥

८८. नेह धर्मानृशंस्याभ्याम् न क्षान्त्या नार्जवेन च ।
पुरुषः श्रियम् आप्नोति न घृणित्वेन कर्हिचित् ।

८९. न मातृपितृवत् कृष्ण धाता भूतेषु वर्तते ।
रोषाद् इव प्रवृत्तो अयम् यथार्थं इतरो जनः ॥

९० आर्यान् शीलवतो दृष्ट्वा ह्रीमतो वृत्तिकर्षिता ।
अनार्यान् सुखिनश्चैव विह्वलामीव चिन्तया ॥

PDF Compressor Pro

९१. आर्यशास्त्रातिगे क्रूरे लब्धे धर्मापचायिनि ।
धार्तराष्ट्रे श्रियं दत्वा धाता किं फलम् अश्नुते ॥

९२. कर्म्म चेत् कृतमन्वेति कर्तारं नान्यम् ऋच्छति ।
कर्मणा तेन पापेन लिप्यते नूनम् ईश्वरः ॥

९३. अथ कर्मकृतं पापं न चेत् कर्तारम् ऋच्छति ।
कारणं बलमेवेह जनान् शोचामि दुर्बलान् ॥

९४. वल्गु चित्रपदं श्लक्ष्णं धनञ्जय त्वया वचः ।
उक्तं यत् श्रुतमस्माभिः नास्तिक्यम् तु प्रभाषसे ।

९५. अतिवादाद् वदाम्येष मा धर्मम् अभिशङ्किथाः ॥
धर्माभिशङ्की पुरुषः तिर्यग् मतिपरायणः ॥

९६. सुखञ्च दुःखञ्च भयाभयञ्च
समानमेतत् पशुभिर् नराणाम् ।
प्रज्ञा हि नृणाम् अधिको विशेषः
प्रज्ञाविहीनाः पशुभिः समानाः ॥

९७. गुह्यं तद् इदम् वो ब्रवीमि ब्रह्म
न मानुषाच् श्रेष्ठतरं हि किञ्चित् ।
ग्रन्थीन् विमुच्य हृदयस्य सर्वान्
प्रियाप्रिये स्वं वशमानयीत ॥

PDF Compressor Pro

९८. न विजानमि यद् इवेदमस्मि
निण्यः सन्नद्धो मनसा चरामि ।
यदा मा आगन् प्रथमजा ऋतस्य
आद् इद् वाचो अश्नुवे भागमस्याः ॥
ऋक.–१–१६४–३७

९९. मानुषेषु महारथ धर्माधर्मौ प्रवर्तते ।
न तथा अन्येषु भूतेषु मनुष्यरहितेष्विह ॥

१००. कामक्रोधसमायुक्तः हिंसालोभसमन्वितः ।
मनुष्यत्वात् परिभ्रष्टः तिर्यग्-योनौ प्रसूयते ॥

१०१. यस्य प्रसादात् तद्भक्तो मर्तो गच्छत्यमर्त्यताम् ।
उत्तमां देवतां पार्थ मा अवमंस्था कथञ्चन ।

१०२. अयं कविर् अकविषु प्रचेता ।
मर्तेषु अग्निर् अमृतो निधायि ।
स मानो अत्र जुहुरः सहस्वः ।
सदा त्वे सुमनसः स्याम ॥ ऋक.–७–४–४

१०३. पापं कुर्वन् पापवृत्तः पापस्यान्तं न गच्छति ।
तस्मात् पुण्यं यतेत् कर्तुम् वर्जयीत च पातकम् ॥

१०४. यत् प्राप्य न निवर्तन्ते यद् आसाद्य न शोचते ।
तत् पदं शेमुषीलभ्यम् अस्त्येवात्र न संशयः ॥

PDF Compressor Pro

१०५. सन्दिग्धायाम् अपि भृशं शुभमेव समाचर ।
तस्यां तु वासनावृद्धौ शुभाद् दोषः न कश्चन ॥

१०६. नास्ति चेद् तद्विचारणे दोषः को भवतां भवेत् ।
अस्ति चेत् तत् समुत्तीर्णो भविष्यसि भवार्णवात् ॥

१०७. एतावदेव पर्याप्तम् उपमानं धनञ्जय ।
कर्मणां फलमाप्नोति धीरो अल्पेनापि तुष्यति ॥

१०८. व्यालकुञ्जरदुर्गेषु सर्पचोरमयेषु च ।
हस्तावापेन गच्छन्ति नास्तिकाः किम् अतःपरम् ॥

१०९. धर्म एव हतः हन्ति धर्मो रक्षति रक्षितः ।
तस्माद् धर्मं न त्यजेत मा ते धर्मः कृतो अवधीत् ॥

PDF Compressor Pro

तृतीया

कामकार-निरासः

अर्जुन उवाच।

१. अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥
३–३६

२. पापस्य यद् अधिष्ठानं यतः पापं प्रवर्तते ।
एतद् इच्छाम्यहं श्रोतुम् तत्त्वेन मधुसूदन ॥

श्रीभगवानुवाच

३. काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥
३–३७

४. धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३–३८

५. आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३–३९

PDF Compressor Pro

६. इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ।। ३—४०

७. तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।। ३-४१

८. किं तस्य तपसा कार्यम् किं यज्ञेन किमात्मना ।
द्वाराणि यस्य सर्वाणि सुगुप्तानि मनीषिणः ॥

९. ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥
२-६२

१०. क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥
२-६३

११. यस्मिन् यस्मिंस् तु विषये यो यो याति विनिश्चयम् ।
तम् तम् एवाभिजानाति नान्यं भरतसत्तम ॥

१२. अर्थे ह्यविद्यामने अपि संसृतिर् न निवर्तते ।
स्वप्नेष्वपि भवत्येष विज्ञाता सुखदुःखयोः ॥

१३. अतः संकल्पसिद्धो अयं संकल्पेनैव नश्यति ।
आत्मना विहितं दुःखम् आत्मना विहितं सुखम् ॥

PDF Compressor Pro

१४. मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यांस्तास्तितिक्षस्व भारत ॥
२-१४

१५. यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ २-१५

१६. यान्येव पुरुषः कुर्वन् सुखैः कालेन युज्यते ।
मुनस् तान्येव कुर्वाणो दुःखैः कालेन युज्यते ॥

१७. नालं सुखाय सुहृदो नालं दुःखाय शत्रवः ।
न च प्रज्ञानम् अर्थेभ्यो न सुखेभ्यो अप्यलं धनम् ॥

१८. मन एव मनुष्याणां कारणं सुखःदुखयोः ।
दुःखं तु विषयापेक्षा निरपेक्षा सुखम् मतम् ॥

१९. कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ १३-२१

२०. बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ ५ २१

२१. येन तृप्यत्य् अमुञ्जानो येन तृप्यत्य् अवित्तवान् ।
येनास्नेहो बलं धत्ते यस् तद् वेद स वेदवित् ॥

PDF Compressor Pro

२२. वाञ्छाकाले यथा वस्तु तुष्टये नान्यदा तथा ।
वाञ्छाकाले तुष्टये यत् तत्र वाञ्छैव कारणम् ॥

२३. चक्षुः पश्यति रूपाणि मनसैव न चक्षुषा ।
मनसि व्याकुले चक्षुः पश्यन्न् अपि न पश्यति ॥

२४. तस्मिन् जिते जिताः लोकाः भविष्यन्त्य अजिता अपि ।
अजिते अजिता एता चिरकाल जिता अपि ॥

२५. चित्तमात्रः नरस् तस्मिन् गते शान्तमिदं जगत् ।
उपानद्-गूढ पादस्य ननु चर्म्यास्तृतैव भूः ॥

२६. सर्वं परवशं दुःखम् सर्वम् आत्मवशं सुखम् ।
एतद् विद्यात् समासेन लक्षणं सुखदुःखयोः ॥

२७. ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥५-२२

२८. न सुखाय सुखं यस्य दुःखम् दुःखाय यस्य नो ।
अन्तर्मुखमतेर् नित्यं स मुक्त इति कथ्यते ॥

२९. परित्यजन्ति ये दुःखं सुखं वाप्युभयं नराः ।
न एव सुखम् एधन्ते ज्ञानतृप्ताः मनीषिणः ॥

PDF Compressor Pro

३०. ये च बुद्धिसुखं प्राप्ताः द्वन्द्वातीताः विमत्सराः ।
तान् नैवार्थाः न चानर्थाः व्यथयन्ति कदाचन ॥

३१. दुःखैर् न तप्येत् न सुखैः प्रहृष्येत्
समेन वर्तेन सदैव धीरः ।
आत्मा बलीयान् इति मन्यमानः
न संज्वरेन् नापि हृष्येत् कथञ्चित् ॥

३२. योऽन्तः सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥५-२४

३३. वैराग्यं पुनर् एतस्य मोक्षस्य परमो विधिः ।
ज्ञानादेव च वैराग्यं जायते येन मुच्यते ॥

३४. न जातु कामः कामानाम् उपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥

३५. अन्त्येषु रेमिरे धीराः न ते मध्येषु रेमिरे ।
अन्त्यप्राप्तिम् सुखं प्राहुर् दुःखम् अन्तरम् अन्त्ययोः॥

३६. यश्चैतान् प्राप्नुयात् सर्वान् यश्चैतान् केवलं त्यजेत्।
प्रापणात् सर्वकामानां परित्यागो विशिष्यते ॥

३७. यत् पृथिव्याम् व्रीहियवं हिरण्यं पशवः स्त्रियः ।
एकस्यापि न पर्याप्तम् तस्मात् तृष्णां परित्यजेत्॥

PDF Compressor Pro

३८. न पूर्वे नापरे जातु कामानाम् अन्तम् आप्नुवन्।
त्यक्त्वा सर्वं समारम्भान् प्रतिबुद्धो असि जागृहि॥

३९. न प्राप्नोति क्वचित् किञ्चित् प्राप्तैरपि महाधनैः।
नान्तः सम्पूर्णताम् एति करण्डक इवाम्बुभिः॥

४०. अन्तो नास्ति पिपासायाः तुष्टिस्तु परमं सुखम्।
तस्मात् सन्तोषमेवेह धनं पश्यन्ति पण्डिताः॥

४१. नाद्भा पूरयितुम् शक्या न मासैर् भरतर्षभ।
अपूर्यां पूरयन् तृष्णां आयुषापि न शक्नुयात्॥

४२. अधनः कस्य किं वाच्यः विमुक्तः सर्वशः सुखी।
देवस्वम् उपगृह्यापि धनेन न सुखी भवेत्॥

४३. अर्था खलु समृद्धा हि बाढं दुःखं विजानताम्।
असमृद्धास्त्वपि सदा मोहयन्त्यविचक्षणान्॥

४४. सञ्चितं सञ्चितं द्रव्यं नष्टं तव पुनःपुनः।
कदाचिन् मोक्ष्यसे मूढ धनेहां धनकामुक॥

४५. न कर्मणा न प्रजया धनेन
त्यागेनैकेन अमृतत्वम् आनशुः।
परेण नाकं निहितं गुहायाम्
विभ्राजद् एतद् यतयो विशन्ति॥

PDF Compressor Pro

४६. जीर्यन्ति जीर्यतः केशाः दन्ताः जीर्यन्ति जीर्यतः।
क्षीयते जीर्यते सर्वं तृष्णैवैका न जीर्यते ॥

४७. या दुस्त्यजा दुर्मतिभिर् या न जीर्यति जीर्यतः।
यो असौ प्राणान्तिको रोगस् तां तृष्णां त्यजतः
सुखम् ॥

४८. गोशताद् अपि गोक्षीरं प्रस्थं धान्यशताद् अपि।
प्रासादाद् अपि खट्वार्द्धं शेषाः परविभूतयः ॥

४९. सर्वत्र पञ्चभूतानि पश्यं किञ्चिन् न विद्यते।
पाताले भूतले स्वर्गे रतिम् एतु क्व धीरधीः ॥

५०. पुनस् तान्येव तान्येव तत्रेहान्यत्र वापि च।
इतश्चेतश्च वस्तूनि नापूर्वं नाम किञ्चन ॥

५१. पानीयं वा निरायासं स्वाद्वन्नं वाभयोत्तरम्।
विचार्य खलु पश्यामि तत् सुखं यत्र निवृत्तिः ॥

५२. इह प्राज्ञः हि पुरुषः स्वल्पम् अप्रियमिच्छति।
यस्य स्वल्पं प्रियं लोके ध्रुवं तस्याल्पम् अप्रियम् ॥

५३. मनसो दुःखमूलं तु तृष्णा इत्युपलभ्यते।
तृष्णया सज्जते जन्तुः दुःखयोगम् उपैति च ॥

PDF Compressor Pro

५४. दृष्ट्वा कुनीन् पक्षहतान् मनुष्यान् आमयाविनः ।
सुसम्पूर्णः स्वया योन्या लब्धलाभो असि भारत ॥

५५. सुखं वा यदि वा दुःखं भूतानां पर्युपस्थितम् ।
प्राप्तव्यम् अवशैः सर्वम् परिहारो न विद्यते ॥

५६. सुखमेव हि दुःखान्तम् कदाचित् दुःखतो सुखम् ।
तस्माद् एतद् द्वयं जह्यात् य इच्छेत् शाश्वतं सुखम् ।

५७. नास्ति रागसमं दुःखम् नास्ति त्यागसमं सुखम् ।
न कामान् अनुरुध्येत दुःखम् कामेषु वै रतिः ॥

५८. यच्च कामसुखं लोके यद् यद् वापि महत् सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥

५९. श्रूयतां ज्ञानसर्वस्वम् श्रुत्वा च हृदि धार्यताम् ।
भोगेच्छमात्रको बन्धस् तत् त्यागो मोक्ष उच्यते ॥

६०. पवित्रं ते वितत्रं ब्रह्मणस्पते
प्रभुर् गात्राणि पर्येसि विश्वतः ।
अतप्ततनुर् न तद् आमो अश्नुते
शृतास इद् वहन्तस् तत् समाक्षते ॥

ऋक्.–९–८३–१

६१. नात्यक्त्वा सुखमाप्नोति नात्यक्त्वा विन्दते परम् ।
नात्यक्त्वा चाभयः शेते त्यक्त्वा सर्वं सुखी भव ॥

PDF Compressor Pro

६२. यद् यद् त्यजति कामानां तत् सुखस्याभिपूर्यते ।
कामानुसारी पुरुषः कामान् अनुविनश्यति ॥

६३. यतो यतो निवर्तते ततस् ततो विमुच्यते ।
निवर्तनात् हि सर्वतो न वेत्ति दुःखमण्वपि ॥

६४. यत् किञ्चिदपि संकल्प्य नरो दुःखे निमज्जति ।
न किञ्चिदपि संकल्प्य सुखमक्षय्यमश्नुते ॥

६५. तपस् त्यागो अवधिरिति निश्चयस्त्वेष धीमताम् ।
परस्परं ज्याय एषाम् येषाम् नैश्रेयसी मतिः ॥

६६. वेदस्योपनिषत् सत्यं सत्यस्योपनिषद् दमः ।
दमस्योपनिषत् त्यागः शिष्टाचारेषु नित्यदा ॥

६७. अत्राप्युदाहरन्तीमं इतिहासं पुरातनम् ।
मीतं विदेहराजेन माण्डव्यायानुपृच्छते ॥

६८. किञ्चिदेव ममत्वेन यदा भवति कल्पितम् ।
तदेव परितापार्थं सर्वं सम्पद्यते तदा ॥

६९. सुसुखं वत जीवामि यस्य मे नास्ति किञ्चन ।
मिथिलायां प्रदीप्तायां न मे दह्यति किञ्चन ॥

७०. यश्च मे दक्षिणं बाहुम् चन्दनेन समुक्षयेत् ।
सव्यं वास्यापि यस्तक्षेत् समावेताव् उभौ मम ॥

PDF Compressor Pro

७१. सुखं निराशः स्वपिति नैराश्यं परमं सुखम् ।
आशां हि अनाशां कृत्वा सुखं स्वपिति पिङ्गला॥

७२. न द्वितीयस्य शिरशस् छेदनं विद्यते क्वचित् ।
न च पाणेस् तृतीयस्य यन् नास्ति न ततो मयम् ॥

७३. अनित्यं सर्वमेवैतद् अहञ्च मम चास्ति यत् ।
यत् किञ्चिन् मन्यसे अस्तीति सर्वं नास्तीति
विद्धि तत् ॥

७४. सुखञ्च दुःखञ्च भवाभवौ च
लाभालाभौ मरणं जीवितं च ।
पर्यायशः सर्वम् एते स्पृशन्ति
तस्माद् धीरो नैव हृष्येत् न शोचेत् ॥

७५. सहस्रिणो अपि जीवन्ति जीवन्ति शतिनस्तथा ।
धनञ्जय मुञ्च कामं न कथञ्चिन् न जीव्यते ॥

७६. विषयान् अश्नुते यस्तु न स भोक्षत्यसंशयम् ।
यो वै भोगान् त्यजेदात्मा स वै भोक्तुम् व्यवस्यति ॥

७७. विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥ २-७१

PDF Compressor Pro

७८. आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥ २-७०

७९. यदा भवति निर्द्वन्द्वो मुनिर् मौनं समाश्रितः ।
अथ लोकमिमं जित्वा लोकं विजयते परम् ॥

८०. सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥
१७-३

८१. दिष्ट्या न त्वं शृगालो वै न क्रिमिर् न च मूषकः।
न सर्पो न च मण्डूको न चान्य पापयोनिजः ॥

८२. आमिषे गृध्यमानानाम् अशुभं वै शुनामिव ।
आमिषं नैव नो हीष्टम् आमिषस्य विवर्जनम् ॥

८३. सर्वे लाभाः साभिमाना इति सत्यवती श्रुतिः ।
सन्तोषणीयरूपो असि यल् लोभाद् अवमन्यसे ॥

८४. राहुग्रस्तस्य सोमस्य यथा ज्योत्स्ना न भासते ।
तथ तमो अभिभूतानाम् भूतानां नश्यते सुखम ॥

PDF Compressor Pro

८५. आत्मानं चेद् विजानीयाद् अयमस्मीति पूरुषः ।
किमर्थं कस्य कामाय शरीरम् अनुसञ्ज्वरेत् ॥

अर्जुन उवाच

८६. स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥
२–५४

श्रीभगवानुवाच

८७. प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ २-५५

८८. दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ २–५६

८९. यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ २-५७

९०. यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥
२-५८

९१. यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ २-६०

PDF Compressor Pro

९२. तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥ २-६१

९३. कामः क्रोधस्तथा लोभः केलिः मात्सर्यमेव च ।
मोहश्चेत्यरिषड्वर्गम् अहङ्कारगतं विदुः ॥

९४. इन्द्रियाणां हि चरतां यन्मनोऽनु विधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ २-६७

९५. तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ २-६८

९६. इन्द्रियाणां तु सर्वेषाम् यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम् ॥

९७. एषः योगविधिः कृत्स्नः यावद् इन्द्रियधारणम् ।
एतन् मूलं हि तपसः कृत्स्नस्य नरकस्य च ॥

९८. तपोमूलम् इदं सर्वं यन् मां पार्थानुपृच्छसि ।
इन्द्रियाण्येव संयम्य तपो भवति नान्यथा ॥

९९. इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥ ७-२८

१००. शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥ ५-२३

PDF Compressor Pro

१०१. नान्यत्र विद्यातपसो नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र सर्वसन्त्यागात् सिद्धिं विन्दति मानवः ॥

१०२. यदा सर्वे प्रमुच्यन्ते कामा ये अस्य हृदि स्थिताः ।
अथो मर्त्यो अमृतोभवत्य् अत्र ब्रह्म समश्नुते ॥

१०३. एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥

२–७२

PDF Compressor Pro

चतुर्थी

सांख्य–निरासः

अर्जुन उवाच

१. ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ।। ३-१

२. व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ।।
३–२

३. धर्मचर्या च राज्यं च नित्यमेव विरुध्यते ।
एवं मुह्यति मे चेतश् चिन्तयानस्य नित्यशः ।।

४. संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ।। ५-१

श्रीभगवानुवाच ।

५. लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ।।
३–३

PDF Compressor Pro

६. वेदाहं तात शास्त्राणि अपराणि पराणि च ।
उभयं वेदवचनं कुरु कर्म त्यजेति च ॥

७. प्रवृत्तिलक्षणो योगः सांख्यं संन्यासलक्षणम् ।
अनुष्ठिते यथा शास्त्रं नयेतां परमां गतिम् ॥

८. द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः ।
वेदे वचनमुक्तं तु कुरु कर्म त्यजेति च ॥

९. साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ५-४

१०. यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥
५-५

११. यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ॥ ६-२

१२. संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ ५-२

१३. उत्तरेण तु पन्थानं आर्याः विषयनिग्रहात् ।
अबुद्धिजं तमस् त्यक्त्वा लोकांस् त्यागवतां गताः ॥

PDF Compressor Pro

१४. दक्षिणेन तु पन्थानं यं भास्वन्तं प्रचक्षते ।
एते क्रियावतां लोकाः ये श्मशानानि भेजिरे ॥

१५. अनिर्देश्यगतिः सा तु यां प्रपश्यन्ति मोक्षिणः ।
तस्माद् योगः प्रधानेष्टः सा तु दुःखं प्रवेदितुम् ॥

१६. संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ५-६

१७. न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ३-५

१८. सर्वे तथा न जीवेयुर् न कुर्युः कर्म चेदिह ।
सर्व एव इमे लोका न भवेयुर् असंशयम् ॥

१९. न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ३-४

२०. कामात्मता न प्रशस्ता न चैवेहास्त्य् अकामना ।
काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः ॥

२१. अत्र गाथा वाञ्छागीताः कीर्तयन्ति पुराविदः ।
शृणु संकीर्त्यमानास् ताः अखिलेन परन्तप ॥

२२. नाहं शक्यो अनुपायेन हन्तुम् भूतेन केनचित् ।
अवध्यः सर्वभूतानाम् अहम् एकः सनातनः ॥

PDF Compressor Pro

२३. यो मां प्रयतते हन्तुम् ज्ञात्वा प्रहरणे बलम् ।
तस्य तस्मिन् प्रहरणे पुनः प्रादुर्भवाम्यहम् ॥

२४. यो मां प्रयतते हन्तुम् धृत्या सत्यपराक्रम ।
भावो भवामि तस्याहं स च मां नावबुध्यते ॥

२५. यो मां प्रयतते हन्तुम् मोक्षमास्थाय पण्डितः ।
तस्य मोक्षरतिस्यस्थ नृत्यामि च हसामि च ॥

२६. यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ३-७

२७. एवमुक्तस्तु कौन्तेय सर्वधर्मभृतां वरम् ।
गुडाकेशो हृषीकेशम् अभ्यभाषत पाण्डवः ॥

२८. कामो हि विविधाकारः सर्वं कामेन सन्ततम् ।
नास्ति नासीत् नाभविष्यत् भूतात् कामात्मकात् परम् ॥

२९. नाकामः कामयत्यर्थं नाकामः धर्ममिच्छति ।
नाकामः कामयानो अस्ति तस्मात् कामः विशिष्यते ॥

३०. तस्यैवं गततृष्णस्य विज्वरस्य निराशिषः ।
का विवक्षास्ति कर्मेषु वीतरागस्य सर्वतः ॥

PDF Compressor Pro

३१. शाश्वतस्याव्ययस्यास्य यद् अस्य ज्ञानमुत्तमम्।
श्रुतेन ज्ञायते सर्वं तद् भवान् नावबुध्यसे ॥

३२. अर्थ इत्येव सर्वेषां कर्मणाम् अव्यतिक्रमः ।
न ह्युते अर्थेन वर्तेते धर्मकामाविति श्रुतिः ॥

३३. न हि कामेन कामो अन्यः साध्यते फलमेव तत् ।
उपयोगात् फलस्यैव काष्ठात् भस्मेव पण्डितैः ॥

३४. धर्ममूलः सदैवा अर्थः कामो अर्थफलमुच्यते ।
संकल्पमूलास् ते सर्वे संकल्पो विषयात्मकः ॥

३५. ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
कारणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥

१८-१८

३६. ज्ञानपूर्वा भवेल् लिप्सा लिप्सापूर्वाभिसन्धिता।
अभिसन्धिपूर्वकं कर्म कर्ममूलं ततः फलम् ॥

३७. संकल्पाज्ज् जायते कामः सेव्यमानः विवर्धते ।
यदा प्राज्ञो विरमते तदा सद्यः प्रणश्यति ॥

३८. न त्वं स्मरसि वारुण्याः लट्वकानाञ्च पक्षिणाम् ।
ताभ्याम् चाभ्यधिकौ भक्ष्यौ न कश्चित् विद्यते
क्वचित् ॥

PDF Compressor Pro

३९. काम जानामि ते मूलं संकल्पात् किल जायसे ।
न त्वां संकल्पयिष्यामि समूलो न भविष्यसि ॥

४०. अर्थस्यावयवावेतौ धर्मकामाव् इति श्रुतिः ।
अर्थसिध्या विनिवृत्ताव् उभावेतौ भविष्यतः ॥

४१. कर्मभिश् चिन्तितो लोको गत्यां गत्यां पृथक् पृथक् ।
तस्मात् कर्माणि नित्यानि मोहात् सांख्यम् यियासति ॥

४२. अन्यथा वर्तमानस्य नास्य वृत्तिः प्रकल्प्यते ।
कर्मणा वर्धते धर्मः यथा कर्म तथैव स ॥

४३. कर्म खल्विह कर्तव्यम् जानतामित्रकर्षण ।
अकर्माणो हि जीवन्ति स्थावराः नेतरे जनाः ॥

४४. यावत् गोस्तनपानाच्च यावच् शयोपसेवनात् ।
जन्तवः कर्मणा वृत्तिम् आप्नुवन्ति महानघ ॥

४५. सर्वे हि स्वम् समुत्थानम् उपजीवन्ति जन्तवः ।
प्रत्यक्षम् फलम् अश्नन्ति कर्मणाम् लोकसाक्षिकम् ॥

४६. कृषन् इत् फालम् आशितं कृणाति ।
यन्न् अध्वानम् अपवृङ्क्ते चरित्रैः ॥

PDF Compressor Pro

वदन् ब्रह्म अवदतो वनीयान् ।
पृनन्न् आपिर् अपृनन्तम् अभिस्यात् ॥
ऋक्-१०-११७-७

४७. यो जागार तम् ऋचः कामयन्ते ।
यो जागार तम् उ सामानियन्ति ॥
यो जागार तम् अयं सोम आह ।
तवाहम् अस्मि सखे नि-ओकाः ॥
ऋक्-५-४४-१४

४८. अकर्मणां वै भूतानां वृत्तिः स्यान् नेह काचन।
तद् एवाभिप्रपद्येत न विहन्यात् कदाचन ॥

४९. अपि चाप्यफलं कर्म पश्याम कुर्वतो जनान् ।
नान्यथा ह्यपि गच्छन्ति वृत्तिं लोकाः कथञ्चन॥

५०. मनसा चिन्तितान् अर्थान् पश्चात् प्राप्नोति कर्मणा ।
मानसं सर्वभूतानां कर्मेत्याहुर् मनीषिणः ॥

५१. कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥
३-६

PDF Compressor Pro

५२. बाह्यद्रव्यविमुक्तस्य मनसा त्वनुगृध्यतः ।
यो धर्मो यत् सुखं वा स्यात् द्विषतां तत् तथास्तु ते ॥

५३. न बाह्यद्रव्यम् उत्सृज्य सिद्धिर् भवति भारत ।
मानसं द्रव्यम् उत्सृज्य सिद्धिर् भवति वा न वा ॥

५४. लब्ध्वा हि पृथिवीं कृत्स्नां सहस्थावरजङ्गमां ।
ममत्वं यस्य नैव स्यात् किं तत् तस्य करिष्यति ॥

५५. अथवा वसतः पार्थ वने वन्येन जीवतः ॥
ममत्वं यस्य द्रव्येषु मृत्योर् आस्ये स वर्तते ॥

५६. आत्मज्ञानं समारम्भस् तितिक्षा धर्मनित्यता ।
यम् अर्थात् नापकर्षन्ति स वै पण्डित उच्यते ॥

५७. सर्वथा धर्मनित्यन्तु पुरुषं धर्मदुर्बलम् ।
त्यजतस् तात धर्मार्थौ प्रेतं दुःखसुखं यथा ॥

५८. अथ चेद् आत्मभाग्येषु नान्येषां सिद्धिम् अश्नुते ।
तस्माद् कर्मैव कर्तव्यं नास्ति सिद्धिर् अकर्मणः ॥

५९. त्रिदण्डधारणं मौनं जटाभारो अथ मुण्डनम् ।
वल्कलाजिनसंवेष्टम् व्रतचर्याभिषेचनम् ॥

PDF Compressor Pro

६०. अग्निहोत्रं वने वासः शरीरपरिशोषणम् ।
सर्वाण्य् एतानि मिथ्या स्युर् यदि भावो न विद्यते॥

६१. विजानतां मोक्ष एषः श्रमः स्याद् अविजानताम् ।
मोक्षयानम् इदं कृत्स्न विदुषां हारीतो अब्रवीत्॥

६२. संकल्पेषु निरारम्भो निराशो निर्ममो भव ।
अशोकं स्थानम् आतिष्ठ इह चामुत्र चाव्ययम्॥

६३. वसन् विषयमध्ये अपि न वसत्येव बुद्धिमान् ॥
संवसत्येव दुर्बुद्धिर् असत्सु विषयेष्वपि ॥

६४. आकिञ्चन्ये न मोक्षो अस्ति किञ्चन्ये नास्ति बन्धनम् ।
किञ्चन्ये चेतरे चैव जन्तुर् ज्ञानेन मुच्यते ॥

६५. त्रयीं च नाम वार्तां च त्यक्त्वा पुत्रान् व्रजन्ति ये।
त्रिविष्टब्धं च वासश्च प्रतिगृह्णान्य् अबुद्धयः ॥

६६. दोषदर्शी च गार्हस्थ्ये यो व्रजत्याश्रमान्तरे ।
उत्सृंजन् परिगृह्णंश्च सोऽपि सङ्गान् न मुच्यते॥

६७. आधिपत्ये तथा तुल्ये निग्रहानुग्रहात्मके ।
राजभिर् भिक्षुकास् तुल्याः मुच्यन्ते केन हेतुना॥

६८. ग्रामान निष्क्रम्य मुनयो विगतक्रोधमत्सराः ।

PDF Compressor Pro

वने कुटुम्बधर्माणः दृश्यन्ते परिमोहिताः ।

६९. सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानिवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥
३-३३

७०. न तथैतानि शक्यन्ते संनियन्तुम् असेवया ।
विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ॥

७१. विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ २-५९

७२. उपोष्य संशितोभूत्वा हित्वा वेदकृताः श्रुतीः ।
आचार इत्यनाचार कृपणाः फलहेतवः ॥

७३. यस्य धर्म्मो हि धर्म्मार्थं क्लेशभाक् न स पण्डितः ।
न स धर्म्मस्य वेदार्थं सूर्यस्यान्धः प्रभामिव ॥

७४. पत्राहारैर् अश्मकुट्टैः दन्तोलूखलिकैस् तथा ।
अब्भक्षैः वायुभक्षैश्च तैर् अयं नरको जितः ॥

७५. त्यागान् न भिक्षुकं विद्यान् न मौढ्यान् न च याचनात् ।
यः कामं त्यजति नार्थं तं मुक्तं विद्धि भिक्षुकम् ॥

PDF Compressor Pro

७६. अहिंसा सत्यवचनं आनृशंस्यम् दमो घृणा ।
एतत् तपो विदुर् धीराः न शरीरस्य शोषणम् ॥

७७. अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥
१७-५

७८. कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तःशरीरस्थं विद्धि तान् एव दानवान् ॥
१७-६

७९. न हि पापानि कर्माणि शुध्यन्त्य् अनशनादिभिः।
नाग्निर् दहति कर्माणि भावशून्यस्य देहिनः ।

८०. निरासैर् अलसैः श्रान्तैः तप्यमानैः स्वकर्मभिः ।
शमस्योपरमो दृष्टः प्रव्रज्यायाम् अपण्डितैः ।

८१. क्रियाविहिनैर् अलसैर् अपण्डितैः प्रवर्तितम् ।
वेदवादापरिज्ञानं सत्याभासम् इवानृतम् ॥

८२. यद्येषा परमा काष्ठा यद्येषा परमा गतिः ।
गृहस्थान् अन्यपाश्रित्य नाश्रमोऽन्यः प्रवर्तते ॥

८३. एवं क्रोशत्सु वेदेषु कुतो मोक्षो अस्ति कस्यचित्।
ऋणवन्तो यदा मर्त्याः पितृदेवद्विजातिषु ॥

PDF Compressor Pro

८४. दत्वातिथिभ्यो देवेभ्यो पितृभ्यः स्वजनाय च।
अवशिष्टानि ये अश्नन्ति तान् आहुर् विघ-
साशिनः।

८५. वीतरागः जितक्रोधः सम्यग् भवति यः सदा।
विषये वर्तमानो अपि न स पापेन युज्यते॥

८६. दान्तस्य किम् अरण्येन तथा अदान्तस्य भारत।
यत्रैव निवसेत् दान्तस् तद् अरण्यं स चाश्रमः॥

८७. नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः॥ ३-८

८८. यथा यथैव जीवेद् हि तत् कर्तव्यम् अहेलया॥
जीवितं मरणाच् श्रेयः जीवन धर्म्मम् अवाप्नुयात्॥

८९. उत्सीदेरन् प्रजाः सर्वाः न कुर्युः कर्म चेदिह।
तथा ह्येता न वर्धेरन् कर्म चेद् अफलं भवेत्॥

९०. अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥ ३-१४

९१. कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥ ३-१५

PDF Compressor Pro

९२. एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥
३-१६

९३. दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ ४-२५

९४. श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति॥४-२६

९५. सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ ४-२७

९६. द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः सांशितव्रताः ॥४-२८

९७. अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥४-२९

९८. अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ४-३०

९९. यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥
४-३१

PDF Compressor Pro

१००. एवं बहुविधा यज्ञा विततता ब्रह्मणो मुखे ।
कमजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥
४-३२

१०१. तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥३-१९

१०२. अन्धं तमः प्रविशन्ति ये अविद्याम् उपासते ।
ततो भूय एव ते तमो य उ विद्यायां रताः ॥
यजु-४०-१२

१०३. अन्यद् एवाहुर् विद्यया अन्यद् आहुर् अविद्यया ।
इति शुश्रुम धीराणं ये नस तद् विचचक्षिरे ॥
यजु-४०-१३

१०४. विद्यां चाविद्यां चैव यस्तद् वेद उभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतम् अश्नुते ॥
यजु-४०-१४

१०५ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ ३-२२

१०६ यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ ३-२३

PDF Compressor Pro

१०७ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥
३-२४

१०८ मासार्धमासाः ऋतव आदित्यः शशितारकम् ।
ईहन्ते सर्वभूतानि तद् इदं कर्म्मसङ्गीतम् ॥

१०९. शाश्वतो अयं धर्म्मपथः नास्यान्तम् अनुशुश्रुम ।
महान् दाशरथः पन्थाः मा पार्थ कुपथं गमः ॥

११०. हतो वा प्राप्स्यसि स्वर्गं जित्वा वा मोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ २-३६

PDF Compressor Pro

पञ्चमी

कर्मयोगः

१. एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥
२-३९

२. नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ २-४०

३. कामः बन्धनमेवैकम् नान्यद् अस्तीह बन्धनम् ।
कामबन्धनमुक्तो हि ब्रह्मभूयाय कल्पते ॥

४. एकः शत्रुर् न द्वितीयो अस्ति शत्रुः
कामेन तुल्यः पुरुषस्य राजन् ।
येनावृतः कुरुते संप्रयुक्तः
घोराणि कर्माणि सुदारुणानि ॥

५. यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ ४-१९

६. यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ३-९

PDF Compressor Pro

७. यज्ञेन यज्ञम् अयजन्त देवास्
तानि धर्माणि प्रथमानि आसन् ।
ते ह नाकं महिमानः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः ॥

ऋक्–१-१६४-५०

८. न द्वेष्ट्यकुशलं कर्म कुशलं नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥

१८-१०

९. धर्म एव मनस् तावत् स्वभावात् पार्थ स्याद् धृतम्।
ददामि देयमित्येव यजे यष्टव्य मित्युत ॥

१०. न धर्मार्थं यशो अर्थं वा धर्मः सतां परन्तप।
धर्मवाणिज्यको हतः जयन्यः धर्मवादिनाम् ॥

११. न धर्मफलम् आप्नोति धर्मं यो दोग्धुमिच्छति ।
यश् चैनं शङ्कते कृत्वा नास्तिक्यात् पापचेतनः ॥

१२. नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ १८-२३

१३. यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ १८-२४

PDF Compressor Pro

१४. अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ १८-२५

१५. यज्ञाय सृष्टानि धनानि धात्रा ।
यज्ञाय सृष्टः पुरुषो रक्षिता च ।
तस्मात् सर्वं यज्ञे एवोपयुज्यम्
धनं न कामाय हितं प्रशस्तम् ॥

१६. इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३-३४

१७. रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ २-६४

१८. प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ २-६५

१९. नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥
२-६६

२०. त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥
१६-२१

PDF Compressor Pro

२१. एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥
१६-२२

२२. यथा कुशलधर्मा स कुशलं प्रतिपद्यते ।
कुशलेनैव धर्मेण गतिमिष्टां प्रपद्यते ॥

२३. तथा कर्मसु विज्ञेयं फलं भवति वा न वा ।
पुरुषस्यात्मनिःश्रेयस् शुभाशुभनिदर्शनम् ॥

२४. यथा यथा हि पुरुषः कल्याणे कुरुते मनः ।
तथा तथास्य सर्वार्थाः सिध्यन्ते नात्र संशयः ॥

२५. यस्य सर्वे समारम्भाः निराशीर्बन्धना द्विज ।
त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान् ॥

अर्जुन उवाच

२६. संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १८-१

श्रीभगवानुवाच

२७. काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ १८-२

PDF Compressor Pro

२८. त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ १८-३

२०. निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥
१८-४

३०. न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ।
१८-११

३१. ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ५-३

३२. यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ १८-५

३३. एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ १८-६

३४. त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥
१७-२

PDF Compressor Pro

३५. अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥
१७-११

३६. अभिसंधाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥ १७-१२

३७. विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १७-१३

३८. देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १७-१४

३९. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥
१७-१५

४०. मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते । १७-१६

४१. श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥
१७-१७

PDF Compressor Pro

४२. सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १७-१८

४३. मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १७-१९

४४. दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥
१७-२०

४५. यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥
१७-२१

४६. अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ १७-२२

४७. अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥
१७-२८

४८. यो अर्चितः प्रतिगृह्णाति ददात्य् अर्चितमेव च ।
ताव् उभौ गच्छतः स्वर्गं नरकं तु विपर्यये ॥

PDF Compressor Pro

४९. मानसं मनसैवायं उपभुङ्क्ते शुभाशुभम् ।
वाचा वाचाकृतं कर्म कायेनैव च कायिकम् ॥

५०. नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥ १८-७

५१. दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥
१८-८

५२. कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः।
१८-९

५३. रागात् क्रोधाद् भयाल् लोभाद् यो अर्थान् ईहेत
मानवः ।
अनीशश्चावमानी च स शीघ्रं भ्रश्यते श्रियः ॥

५४. धर्मकार्यं यतन् शक्त्या नोचेत् प्राप्नोति मानवः ।
प्राप्तो भवति तत् पुण्यम् अत्र मे नास्ति सन्देहः॥

५५. विच्छिद्यन्ते समारब्धा सिध्यन्ते चापि दैवतः ।
कृते पुरुषकारे तु नैनः स्पृशति पार्थिव ॥

PDF Compressor Pro

५६. न म्रियेयुर् न जीवेयुर् सर्वे स्युः कामकामिकाः ।
नाप्रियं प्रतिपद्येयुर् वशित्वं यदि वै भवेत् ॥

५७. य एवं कृतबुद्धिः सन् कर्मस्वेवं प्रवर्तते ।
नासिद्धौ व्यथते तस्य न सिद्धौ हर्षम् अश्नुते ॥

५८. पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥
१८-१३

५९. अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥
१८-१४

६०. शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥
१८-१५

६१. तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥१८-१६

६२. अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥
१८-१२

PDF Compressor Pro

६३. मनसा चिन्तयन् धर्मं कर्मणा नाभिरोचयन् ।
न प्राप्नोति फलं तस्य इत्येवं धर्मविदो विदुः ॥

६४. न धर्मसाधनं वाचा नैव बुद्ध्येति नः श्रुतम् ।
इति बार्हस्पतं ज्ञानं प्रोवाच मघवा स्वयम् ॥

६५. पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्वे व्यसनिनः मूर्खाः यः क्रियावान् स पण्डितः ॥

६६. न गाथा गाथिनं शास्ति बहु चेदपि गायति ।
प्रकृतिं यान्ति भूतानि भूल्लिङ्गशकुनिर् यथा ॥

६७. धेनुर् वत्सस्य गोपस्य स्वामिनस् तस्करस्य च ।
पयः पिबति यस्तस्याः धेनुस्तस्येति निश्चयः ॥

६८. न वेदानां परिभवान् न शाठ्येन न मायया ।
कश्चिद् महद् अवाप्नोति मा ते भूद् बुद्धिर् ईदृशी ॥

६९. यो हि तेजो यथाशक्ति न दर्शयति विक्रमात् ।
क्षत्रियो जीविताकाङ्क्षी स्तेन इत्येव तं विदुः ॥

७०. अस्तु वात्र फलं मा वा कर्तव्यं पुरुषेण यत् ।
कर्तव्यमेव तद् इति मनोर् एष विनिश्चयः ॥

PDF Compressor Pro

७१. मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥
१८-२६

७२. रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥
१८-२७

७३. अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥
१८-२८

७४. धृत्या यया धारयते मनःप्राणेन्द्रियाक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥
१८-३३

७५. यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥
१८-३४

७६. यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥
१८-३५

PDF Compressor Pro

७७. अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः ।
शोको भयं क्लैब्यं दैवं निद्रातन्द्राक्लवो वेगः ॥

७८. नौषधानि न मन्त्राश्च न होमाः न पुनर् जपाः ।
त्रायते मृत्युनोपेतं जरया परिवारितम् ॥

७९. न शोकः शोचमानस्य विनिवर्तेत कर्हिचित् ।
यदा च शोचतः शोकः व्यसनं नापकर्षति ॥

८०. यत्तु कार्यम् भवेत् कार्यम् कर्मणा तत् समाचर ।
हीनचेष्टस्य यः शोकः स हि शत्रुर् धनञ्जय ॥

८१. शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढम् आविशन्ति न पण्डितम् ॥

८२. यद्धि भूतं भविष्यच्च सर्वं तन्न भविष्यति ।
एवं विदितवेद्यस्त्वम् अधर्मेभ्यः प्रमोक्ष्यसे ॥

८३. अधीताः विधिवद् वेदा अग्नयश्च हुतास्त्वया ।
इष्टश्च बहुभिर् यज्ञैः मा ते मृत्युकृतं भयम् ॥

८४. अयुध्यमानः म्रियते युध्यमानश्च जीवति ।
कालं प्राप्य धनञ्जय न कश्चिद् अतिवर्तते ॥

८५. अभूत्वा हि भवन्त्यर्थाः भूत्वा नश्यन्ति चापरे ।
काले व्यसनमाकाङ्क्ष्व नैवायमजरामरः ॥

PDF Compressor Pro

८६. सुखं सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम् ।
हतो अपि लभते स्वर्गं हत्वा हि लभते यशः ॥

८७. सन्तोषो वै श्रियं हन्ति तथानुक्रोश एव च ।
अनुत्थानमये चोभे निरीहो नाप्नुते महत् ॥

८८. उद्यच्छेत् एव न नमेत् उद्यमो ह्येव पौरुषम् ।
अप्यपर्वाणि भज्येत न नमेतेह कस्य चित् ॥

८९. यश्च दिष्टपरो लोके यश्चापि हठवादिकः ।
उभावपि शठावेतौ कर्मबुद्धिः प्रशस्यते ॥

९०. काकतालीयवत् प्राप्तम् दृष्ट्वापि निधिमग्रतः ।
न स्वयं दैवमादत्ते पुरुषार्थम् अपेक्षते ।

९१. दैवमेवेह चेत् कर्ता पुंसः किमिव चेष्टया ।
स्नानादानास्नोच्चारान् दैवमेव करिष्यति ॥

९२. ये शूराः ये च विक्रान्ताः ये प्राज्ञाः ये च पण्डिताः ।
तैस् तैः किमिव लोके अस्मिन् वद दैवं प्रतीक्ष्यते ।

९३. ऐकगुण्यम् अनीहायाम् अभावः कर्मणां फलम् ।
अथ द्वैगुण्यम् ईहायां फलं भवति वा न वा ॥

PDF Compressor Pro

९४. नालसा प्राप्नुवन्त्य् अर्थान् न क्लीबाः नाभिमानिनः।
न च लोकरवाद्भीताः न च शश्वत् प्रतीक्षिणः॥

९५. आयुर् न सुलभं लब्ध्वा नावकर्षेत् धनञ्जय।
उत्कर्षार्थं प्रयतेत नरः पुण्येन कर्मणा॥

९६. सुखं दुःखान्तम् आलस्यं दाक्ष्यं दुःखं सुखोदयम्।
भूतिः श्रीर् ह्रीर् धृतिः कीर्तिः दक्षे वसति नालसे॥

९७. श्वःकार्यम् अद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्।
अद्यैव कुरु यच्च् श्रेयो मा त्वा कालो अत्यगान् महान्॥

९८. मृत्युनाभ्यहतो लोकः जरया परिवारितः।
रात्र्यां रात्र्यां व्यतीतायां आयुर् अल्पतरं भवेत्॥

९९. इदं कृतम् इदं कार्यम् इदम् अन्यत् कृताकृतम्।
सञ्चिन्वानकमेवैनं मृत्युर् आदाय गच्छति॥

१००. आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः।
कर्माण्यारभमानं हि पुरुषं श्रीर् निषेवते॥

१०१. यद् दुस्तरं यद् दुरापं यद् दुर्गं यच्च दुष्करम्।
सर्वं हि तपसा साध्यं तपो हि दुरतिक्रमम्॥

PDF Compressor Pro

१०२. क्रोधो हर्षश्च दर्पश्च ह्रीस्तम्भोमान्यमानिता ।
यमर्थात नापकर्षन्ति स वै पण्डित उच्यते ॥

१०३. युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ ५-१२

१०४. गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ ४-२३

१०५. स्फटिकः प्रतिबिम्बेन यथा नायाति बन्धनम् ।
तज्ज्ञः कर्मफलेनान्तः तथा नायाति बन्धनम् ॥

१०६. सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ ३-१०

१०७. देवान्भावायतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ३-११

१०८. इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥
३-११

१०९. यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ ३-१३

११०. सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ २-३८

PDF Compressor Pro

प्रज्ञानिष्ठा

१. किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥
४-१६

२. कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥४-१७

३. न हि कार्यम् अकार्यम् वा सुखं ज्ञातुं कथञ्चन ।
सूक्ष्मा गतिर् हि धर्मस्य बहुशाखा ह्यनन्तिका ॥

४. अन्ये सामं प्रशंसन्ति न्यायामम् अपरे जनाः ।
नैकं न चापरे केचित् उभयं च तथा अपरे ॥

५. यज्ञमेके प्रशंसन्ति संन्यासम् अपरे जनाः ।
दानमेके प्रशंसन्ति केचित् चैव प्रतिग्रहम् ॥

६. अपरे वचनैः पुण्यैः वादिनो लोकनिश्चये ।
अनिश्चयज्ञा धर्माणाम् अदृष्टान्ते परे हताः ॥

PDF Compressor Pro

७. श्रुतेर् धर्म इति ह्येके वदन्ति बहवो जनाः ।
तत् ते न प्रत्यसूयामि न च सर्वं विधीयते ॥

८. सदाचारो मतो धर्मः सन्तस् त्वाचारलक्षणाः ।
साध्यासाध्यं कथं शक्यम् सदाचारो ह्यलक्षणः ॥

९. न धर्मः परिपाठेन शक्यो भारत वेदितुम् ।
अन्यो धर्मः समस्थस्य विषमस्थस्य चापरः ॥

१०. यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥२-५२

११. श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥२-५३

१२. धर्मस्य विधयो नैके ये वै प्रोक्ता महर्षिभिः ।
स्वं स्वं प्रज्ञानमाश्रित्य दमस्तेषां परायणम् ॥

१३. प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥
१८-३०

१४. यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥
१८-३१

PDF Compressor Pro

१५. अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥
१८-३२

१६. यदा संहरते कामान् कूर्मो अङ्गान् इव सर्वशः ।
तद् आत्मज्योतिर् आचिराद् आत्मन्येव प्रसीदति ॥

१७. प्रज्ञा प्रतिष्ठा भूतानां प्रज्ञा लाभः परो मतः ।
प्रज्ञा निःश्रेयसी लोके प्रज्ञा स्वर्गः मतः सताम् ॥

१८. ध्रुवं ज्योतिर् निहितं दृशये कम्
मनो जविष्ठं पतयत्सु अन्तः ।
विश्वे देवाः समनसः सकेताः
एकं क्रतुम् अभिवियन्ति साधु ॥
ऋक्-६-९-५

१९. वैश्वानरस्य सुमतौ स्याम
राजा हि कम् भुवनानाम् अभिश्रीः ।
इतो जातो विश्वमिदं विचष्टे
वैश्वानरो यतते सूर्येण ॥
ऋक्-१-९८-१

PDF Compressor Pro

२०. अहश्च कृष्णम् अहर् अर्जुनं च,
विवर्तते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजा
अवातिरज् ज्योतिषा अग्निस् तमांसि ॥

ऋक्–६–९–१

२१. यमो वैवस्वतो देवः यस् तवैष हृदि स्थितः ।
तेन चेद् अभिवादस् ते मा गङ्गां म कुरून् गमः ॥

२२. यदैतम् अनुपश्यति आत्मानं देवमञ्जसा ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥

२३. प्रज्ञाचक्षुर् यदा कामे दोषमेवानुपश्यति ।
विमुच्यते तदा कामान् न च धर्मं विमुञ्चति ॥

२४. एकः शास्ता न द्वितीयो अस्ति शास्ता
यो हृच्छयस् तम् अहमनुब्रवीमि ।
तस्मिन गुरौ गुरुवासं निरुष्य
शक्रो गतः सर्वलोकामरत्वम् ॥

२५. सर्वस्य तु स्वका प्रज्ञा साधुवादे प्रतिष्ठिता ।
सर्वो हि मन्यते लोकः आत्मानं बुद्धिमत्तरम् ॥

PDF Compressor Pro

२६. पुरुषे पुरुषे बुद्धिर् या या भवति शोभना ।
तुष्यन्ति तु पृथक् सर्वे प्रज्ञया ते स्वया स्वया ॥

२७. तस्यैव तु मनुष्यस्य सा सा बुद्धिस् तदा तदा ।
कालयोगे विपर्यासं प्राप्या अन्योऽन्य विपद्यते ॥

२८. अन्यया यौवने मर्त्यो बुद्ध्या भवति मोहितः ।
मध्ये अन्यया जरायां तु सो अन्यां रोचयते मतिम् ॥

२९. एकस्मिन् एव पुरुषे सा सा बुद्धिस् तदा तदा ।
भवत्य् अकृतप्रज्ञत्वात् सा तस्यैव न रोचते ॥

३०. यस्मिन् सर्वाणि भूतानि आत्मैवाभूत् विजानतः।
तत्र कः शोकः कः मोहः एकत्वम् अनुपश्यतः॥
यजु.-४०-७

३१. यद् अन्यैर् विहितं नेच्छेद् आत्मनः कर्म पूरुषः ।
न तत् परेषु सन्दध्याद् जानन् अप्रियमात्मनः ॥

३२. अहिंसा परमो धर्मस् तथा अहिंसा परं तपः ।
अहिंसा परमं सत्यं हिंसा चाधर्मलक्षणा ॥

३३. मा हिंस्याः सर्वभूतानि मैत्रायणगतस् चरेत् ।
अहिंसा परमं सत्यं यतो धर्मः प्रवर्तते ॥

PDF Compressor Pro

३४. न विशेषेण गन्तव्यम् न विच्छिन्नेन वा पुनः ।
न जातु नाहम् अस्मी इति सुप्रसक्तम् असाधुषु ॥

३५. व्यसनं वा महाघोरम् समृद्धिं वापि तादृशीम् ।
अवाप्य पुरुषः पार्थ कुरुते बुद्धिवैकृतिम् ॥

३६. गृहं छत्राणि मित्राणि स्वदेश इति चापरे ।
इत्येवम् अवसीदन्ति नराः बुद्धिविपर्यये ॥

३७. परिमुष्णन्ति शास्त्राणि धर्मस्य परिपन्थिनः ।
वैषम्यम् अर्थवादानां निरर्थां स्थापयन्ति ते ॥

३८. सर्वं जिह्मं मृत्युपदं आर्जवं ब्रह्मणः पदम् ।
एतावान् ज्ञानविषयः किं प्रलापः करिष्यति ॥

३९. ममेति च भवेन् मृत्युर् न ममेति च शाश्वतम् ।
ब्रह्म-मृत्यू ततो राजन् आत्मन्येव समाश्रितौ ॥

४०. न हर्तव्यम् परधनम् इति धर्मः सनातनः ।
मन्यन्ते बलवन्तस् तम् दुर्बलैः संप्रवर्तितम् ॥

४१. यदा नियति दौर्बल्यम् अथैषामेव रोचते ।
न ह्यत्यन्तं बलवन्तो भवन्ति सुखिनो अपि वा ॥

४२. रमते निर्हरन् स्तेनः परवित्तम् अराजके ।
यदा अस्य तद् हरन्त्य् अन्ये तदा राजानमिच्छति॥

PDF Compressor Pro

४३. तदा तेषां स्पृहयते ये वै तुष्टा स्वकैर् धनैः ।
तस्माद् अनार्जवे बुद्धिः न ते कार्या कथञ्चन ॥

४४. दातव्यमित्ययं धर्म उक्तः भूतहिते रतैः ।
तं मन्यन्ते धनयुताः कृपणैः संप्रवर्तितम् ॥

४५. यदा नियति कार्पण्यम् अथैषमेव रोचते ।
न ह्यत्यन्तं बलवन्तो भवन्ति सुखिनो अपि वा ॥

४६. सर्वो विमृषते जन्तुः कृच्छ्रस्थो धर्मदर्शनम् ।
पदस्थः पहितं द्वारं परलोकस्य पश्यति ॥

४७. नैव नित्यं जयस् तात नैव नित्यं पराजयः ।
तस्माद् भोजयितव्यश्च भोक्तव्यश्च परो जनः ॥

४८. आर्जवेनैव गन्तव्यम् न सुखान्वेषिणा तथा ।
नान्वेष्टव्या विशेषास्तु विशेषा हि प्रसङ्गिनः ॥

४९. न हि दुश्चरितं किञ्चित् आत्मनो अन्येषु पश्यति ।
तस्माद् अनार्जवे बुद्धिर् न ते कार्या कथञ्चन ॥

५०. अनुस्मृत्य तु शास्त्राणि कवयः समवस्थिताः ।
अपीह स्याद् अपीह स्यात् सारासारदिदृक्षया ॥

५१. वेदवादान् अतिक्रम्य शास्त्राण्य् आरण्यकानि च ।
विपाट्य कदलीस्तम्भं सारं ददृशिरे न ते ॥

PDF Compressor Pro

५२. नास्ति सत्यात् परो धर्मः नानृतात् पातकं परम्।
स्थितिर् हि सत्यं धर्मस्य तस्मात् सत्यं न लोपयेत्॥

५३. परिनिष्ठितकार्यो हि स्वाध्यायेन द्विजो भवेत्।
कुर्याद् अन्यन् न वा कुर्याद् मैत्रः ब्राह्मण उच्यते॥

५४. आत्मवत् सर्वभूतेषु यश्चरेत् नियतः शुचिः।
अमानी निरभिमानः सर्वथा मुक्त एव सः॥

५५. कः कस्य चोपकुरुते कश्च कस्मै प्रयच्छति।
प्राणो करोत्य् अयं कर्म सर्वम् आत्मार्थम् आत्मना॥

५६. न ह्यात्मनः प्रियतरः किञ्चिन् भूतेषु निश्चितम्।
सर्वस्यात्मा बहुमतः सर्वा आत्मानं प्रशंसति॥

५७. ईषद् अप्यङ्गदाराणां पुत्राणाम् चरन् अप्रियम्।
ततो ज्ञास्यसि कः कस्य केन वा कथमेव च॥

५८. न ह्ययम् कस्यचित् कश्चित् नास्य कश्चन विद्यते।
एकः प्रजायते जन्तुर् एक एव प्रलीयते॥

५९. अहम् एको न मे कश्चित् नाहम् अन्यस्य कस्यचित्।
न तं पश्यामि यस्याहं तं न पश्यामि यो मम॥

६०. न पुक्कशो न चाण्डालो आत्मानं त्यक्तुम् इच्छति।
तया तुष्टः स्वया योन्या मायां पश्यस्व यादृशीम्।